This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

कविकुलगुरू कालिदास संस्कृत विश्वविद्यालय रामटेक

हस्तलिखित संग्रह

दाखल क्र. M-3005 विषय साहित्य

नाव किरातार्जुनीये काव्ये द्वितीयसर्ग

लेखक/लिपीकार

पृष्ठ 21 काळ पुर्ण/अपुर्ण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथकिरातार्जुनीयेकाव्येद्वितीयसर्गप्रारंभः श्रीः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीगणेशायनमः विहितामिति अथवृकोदरोभीमः प्रियया द्रौपद्या प्रियाग्रहणं अस्याहितोपदेशास्त्वनार्थं विहितामपि हितामित्यर्थः विपूर्वस्यदधातेः क्रियासामान्यवाचिनोयोगविशेषपर्यवसानात् मनःप्रियामभिहितार्थमयोगान्मनोहरां

विहितांप्रिययामनःप्रियामथनिश्चित्यगिरंगरीयसीं
उपपन्निमदूर्जिताश्रयंनृपमूचेवचनंवृकोदरः १

विशेषणद्वयेनापिगिरोगाद्यत्वमुक्तं गिरंगरीयसींसारवत्तरांनिश्चित्य नृपंधर्मराजं उपपन्निमत्युक्तियुक्तं ऊर्जिताश्रयमुदारार्थं वचनमूचेउक्तवान् कर्तरिलिट् ब्रुवोवचिरादेशः ब्रुविशासीत्यादिनाहिकर्मकत्वं अकथितंचेतिनृपस्यकर्मत्वं १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंतद्वचनंतदाह यदिति मानिनीक्षत्रियकुलाभिमानवतीद्रौपदीस्नेहमयेनस्नेहप्रचुरेण तत्प्रकृतवचनेमयट् चक्षु-
षाज्ञानचक्षुषा एतेनाप्तत्वमुक्तं परितोवीक्ष्य समंतादिविच्य यद्वचनमवोचत् ब्रुवोवचेर्वालुङ् वचउमिनिउमाग
मः वागधिपस्यद्रुहस्यतेरपिदुर्वचंवक्तुमशक्यं शेषेषष्ठीयंनद्वयोगलक्षणा अतोनलोकेत्यादिनाषष्ठीनिषेधोनास्ति

यद्वोचद्वेक्ष्यमानिनीपरितःस्नेहमयेनचक्षुषा अ
पिवागधिपस्यदुर्वचंवचनंतद्विदधीनविस्मयम् २

तद्वचनंविस्मयंविदधीनप्रकुर्वीत सर्वस्यापीनिशेषः अथवावागधिपस्यापिविस्मयंविदधीनेतिसंबंधः दुर्वचंके
नापीनिशेषः यस्त्रैणमपिशास्त्रं अनुरुणद्धिहितंचानुबध्नाति अतोविस्मयकरं ग्राह्यंचैतद्वचनमितितात्पर्या
र्थः २ ७ ७ ७ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विस्मयकरत्वेहेतुमाह विषमइति विषमोपि दुर्बोधोपि अन्यत्रदुःप्रवेशोपिनयोनीतिशास्त्रं पयसामाशयोहृदइव कृततीर्थः कृताभ्यासाद्युपायः सन् तीर्थंशास्त्रेध्वरेक्षेत्रोपायोपाध्यायमंत्रिषिनिवेजयंती अन्यत्रकृतजलावतारः सन् तीर्थंयोनौ जलावतारेचेतिहलायुधः विगाह्यतेविगृह्यतेप्रविश्यतेच किंतुतत्रनयेसनादृशःपुरुषःविशे

विषमोपिविगाह्यतेनयः कृततीर्थःपयसामिवाशयः
सतुतत्रविशेषदुर्लभःसदुपन्यस्यतिकृत्यवर्त्मयः ३

षदुर्लभः यःकृत्यंसंधिविग्रहादिकार्यंस्नानादिकंच तस्यवर्त्मसत्साधु देशकालाद्यविरुद्धंयथार्थमित्यर्थः अन्यत्रचसत्गतंग्राहपाषाणादिरहितं उपन्यस्यतिउदाहरति उपन्यासस्तुवाङ्मुखं उपोद्घातउदाहारमित्यमरः यथाकेचित्कृततीर्थेपयसिगंभीरेपिप्रवेष्टारःसंति तीर्थकरस्तुविरलः तद्वन्नीतावपिनिगूढमपितत्वंसतिवक्तारिबोद्धारःसंति वक्तातुनस्फुलभः इयमपठितासाधुवक्तीतियुज्यतेविस्मयइतितात्पर्यार्थः ३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथयाद्यत्वेहेतुमाह परिणामेति परिणामःफलकालःपरिपाकावस्थाच तत्रस्करेवेहिते शास्त्रेचार्थेऽपुण्ये पापंपुण्यंस्क-
रवादिचेत्यमरः स्करशब्दस्यविशेष्यलिंगत्वं गरीयसिगुर्वर्थप्रतिपादके अर्थभूयिष्ठेश्रेष्ठेच क्षतौजसांउभयत्रापि-

परिणामस्करेगरीयसिव्यथकेस्मिन्वचसिक्षतौजसां
अतिवीर्यवतीवभेषजेबहुरल्पीयसिदृश्यतेगुणः ४

क्षीणशक्तीनां व्यथकेयुद्धेपीडूलकत्वाद्भयंकरे अन्यत्रादौसंतापादिदुःखजनके अल्पीयस्यल्पाक्षरे अल्पमात्रेच उक्तंच
स्वल्पान्चमात्राबहुलोगुणाश्चेति अस्मिन्वचस्यतिवीर्यवत्यत्यंतसामर्थ्यवतिभेषजे औषधेइव भेषजौषधभैषज्यंइत्यमरः
बहुरधिकोगुणःमानत्राणराज्यलाभादिरारोग्यबलसिद्धिश्चदृश्यते अतोग्राह्यमस्यावचनमितिभावः ४ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सत्यमेवमत्यंनरोचतेकिंकरोमीत्यतआह इयमिति रुचिरार्थाहिनार्थंसंपन्नेतिरुचिरत्वेहेतूक्ति. इयं भारतीद्रौपदी- वाक्यं इष्टगुणायअभिमतगुणायगुणग्राहिणेइत्यर्थः भवतेतुभ्यं रुच्यर्थानांप्रीयमाणइतिसंप्रदानाच्चतुर्थी रोचतो-

इयमिष्टगुणायरोचतांरुचिरार्थाभवतेपिभारती ननु
वक्तृविशेषनिःस्पृहागुणगृह्यावचनेविपश्चितः ५

प्रियतांस्वदतां विध्यर्थैलोट् हितवचनेबलादपीच्छांकुर्यादौषधवदितिभावः तथापिस्त्रैणेवचसिकाश्रद्धातत्राह नन्विति गुणानांगृह्यागुणगृह्याःगुणपक्षपातिनइत्यर्थः पदास्तेरिबाल्यापक्षेषुचेतिग्रहेःक्यप् विपश्चिनोविद्वासः विद्वान्विपश्चि द्दोषज्ञइत्यमरः वचनेविषये वक्तृविशेषेस्त्रीपुंसादिलक्षणे निःस्पृहाः ननुनिरास्थाःखलु बालादपिसुभाषितंग्राह्यमितिभावः५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संप्रतिस्वयमुपालभते चनस्रुष्विति हेनृप चनस्रुष्वपि विद्यासु आन्वीक्षिक्यादिषु आन्वीक्षिकीत्रयीवार्तादंडनीतिश्चेशा श्वती विद्यात्वेताश्चतस्रश्लोकसंस्थितिहेतवइतिकामंदकः निरूढिमागताप्रसिद्धिंगता अतएवविवेकिनीसद्सद्विवेक वती यथाहमनुः आन्वीक्षिक्यांतुविज्ञानंधर्माधर्मौत्रयीस्थितौ अर्थानर्थौचवार्तायांदंडनीत्यांनयानयाविति तेमतिः कथंक रिणी पंकमिव विपर्ययंवैपरीत्यं अविवेकरूपत्वमेत्य अवसीदतिनश्यतिएतन्नयुक्तमितिभावः ६ किन्नाम्छिन्नमिद्वा

चनस्रुष्वपितेविवेकिनीनृपविद्यासुनिरूढिमागता कथमेत्यमतिर्विपर्ययंकरिणीपंकमिवावसीदति ६
विधुरंकिमतःपरंपरैरवगीतांगमितेदृशामिमाम् अवसीदतियत्सुरैरपित्वयिसंभावितवृत्तिपौरुषं ७

नीयेनत्वमुपालभसइत्यत्राह विधुरमिति त्वयि परैःशत्रुभिः इमामीदृशीं अवगीतांगार्हितां अवगीतंचनिर्वादेमुहुर्दृष्टेचगर्हि तेइतिविश्वः दृशांगमितेप्रापितेसति सुरैरपिसंभावितवृत्तिबहुकृतप्रसादं अथवानिश्चितसद्भावं पौरुषंपुरुषकारः युवा दित्वादण्प्रत्ययः अवसीदतिनश्यति इतियत् अतःपरं अतोन्यत् अधिकंकिंविधुरंकिंकष्टं नकिंचिदित्यर्थः विधुरंप्रत्य वायेस्यान्नकष्टविश्लेषयोरपीतिवैजयंती अस्तीतिशेषः अस्तिर्भवतीपरः प्रथमःपुरुषोऽप्रयुज्यमानोप्यस्तीतिभाष्यकारः भवंतीतिलटःपूर्वाचार्याणांसंज्ञा यत्पुरुषाधिक्यस्यदुर्दशासाचशत्रुकृताइतिमहत्कष्टं तच्चत्वयोपेक्ष्यतइत्युपालभ्यतइत्यर्थः ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथोपेक्षाकालत्वादियमुपेक्षेत्याशंक्य नायमुपेक्षाकालइतिवक्तुंतद्देवतावत्श्लोकद्वयेनविविनक्ति द्विषतामिति भूतिमुदयमिच्छताशोभनामेधायस्यतेनक्षमेधसाक्षधिया नित्यमसिच्प्रजामेधयोरित्यसिच्प्रत्ययः गुरुर्महानपि अस्वंततरः अत्यंतदुरंतःक्षयोन्मुखइत्यर्थः द्विषतामुदयःवृद्धिःक्षमर्षणः क्षरवेनमृष्यतइन्क्षमर्षणःक्षमहः उपेक्ष्यइत्यर्थः

द्विषतामुदयःक्षमेधसागुरुरस्वंततरःक्षमर्षणः
नमहानपिभूतिमिच्छताफलसंपत्त्यवणःपरिक्षयः८

स्वंतश्चदुर्मर्षणइतिभावः भाषायांशासीत्यादिनारवलर्थेयुच् महानपि फलसंपत्त्यवणः फलसिध्युन्मुखः प्रतिरंतरित्यादिनाणत्वं परिक्षयोनक्षमर्षणः नोपेक्ष्यइत्यर्थः अन्यथात्वपेक्ष्यइतिभावः नत्वुदयएवप्रतिकार्यः नचक्षयएवोपेक्ष्यइत्यर्थः किंतुस्वंतत्वास्वंतत्वाभ्यांउभावपिप्रतिकार्यौउपेक्ष्यौचभवतइत्यर्थः ८ ७ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथोभयोरपिमध्येएकतरस्योदयक्षययोर्गतिमुत्कादृदानींयुगपत्परिक्षयागमेगतिमाह अचिरेणेति कृतमनेनेतिकृतीकु
शलइत्यर्थः इष्टादिभ्यश्चेतिइनिप्रत्ययः परस्यशत्रोःक्षययुक्तिंक्षययोगं अचिरेणाशुभाविनीं भूयसींदुरंतांच तथा
आत्मनः क्षययुक्तिंविपरीतांचिरभाविनीं अल्पीयसींस्वंतांचविगणय्यविचार्यल्पफलमुपूर्वादित्यादेशःउपेक्षते अ
न्यथाउक्तवैपरीत्येपरस्यक्षययुक्तौ अल्पीयस्यांस्वस्यभूयस्यामित्यर्थः तत्प्रतिकारंतस्याक्षययुक्तेःप्रतिकारं अचि

अचिरेणपरस्यभूयसींविपरीतांविगणय्यचात्मनः क्षययुक्तिमुपेक्षतेकृतीकुरुतेतत्प्रतिकारमन्यथा ९
अनुपालयतामुदेष्यतींप्रभुशक्तिंहिषतामनीहया अपयांत्यचिरान्महीभुजांजननिर्वादभयादिवश्रियः १०

रेणाशुकुरुते एवंचसतियदाशत्रोरभ्युदयःस्वस्यचातिपरिक्षयोयथास्माकंतदाकिंवक्तव्यमित्यर्थः सद्यःप्रतिकारंकुरुते
इत्यर्थात्सिद्धमनुसंधेयं ९ तथाचोपेक्षायामनिष्टमाचष्टे अनुपालयतामिति उदेष्यतींवर्धिष्यमाणां आच्छीनद्योर्नुमितिविक
ल्पान्नुमभावः हिषतां प्रभुशक्तिं कोशदंडजंतेजः सप्रभावःप्रतापश्चयत्तेजःकोशदंडजमित्यमरः अनीहया अनुत्साहे
न अनुपालयतांउपेक्ष्यमाणानांमहीभुजांश्रियः संपद्भोजननिर्वादभयात्तन्निकृष्टपुरुषानुरागात्तल्लोकापवादभयादितिहेतूत्प्रे-
क्षा अचिरादपयांति अपसरंति यथाहकामंदकः स्त्रीभिःषंढइवश्रीभिरलसः परिभूयतइति अतःपराक्रमितव्यमितिभावः १०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननुपदद्वयतंणः कथंप्रबलेनाभियुज्यतेइत्यत्राह क्षयेति क्षययुक्तमपितथाक्षीणमपिसंतंस्वभावजंशिवंसर्वलोकाल्हादकं धामक्षात्रंतेजः प्रकाशंचदधतं समृद्धयेऽभ्यर्थं उत्थितमुद्युक्तंउत्साह मानमितियावत् अन्यत्रउत्थितमुदितं अतएव अ

क्षययुक्तमपिस्वभावजंदधतंधामशिवंसमृद्धये
प्रणमंत्यनपायमुत्थितंप्रतिपच्चंद्रमिवप्रजानृपं ११

नपायमविनाशिनंवर्धिष्णुमित्यर्थः नृपंप्रजाःप्रतिपच्चंद्रंद्वितीयाचंद्रमिवेत्यर्थः प्रतिपच्छब्देनद्वितीयाग्रहणंप्रतिपादितस्या दृश्यत्वादिति प्रणमंतिप्रक्षीभावेनवर्त्तंतइतिभावः चंद्रंतुनमस्कुर्वंति क्षीणस्याप्युत्साहः कार्यसिद्धेर्निदानमित्यर्थः श्रियंहिसततोत्साहोदुर्बलोपिसमश्नुतेइतिकामंदकः ११ ४ ४ ४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननुप्रभुशक्तिशून्यस्योत्साहःकुत्रोपयुज्यतेइत्यत्राह प्रभवइति कर्मणामारंभोपायाःपुरुषद्रव्यसंपत्तदेशकालविभागाः विनिपातप्रतीकारः कार्यसिद्धिश्चेतिपंचांगानि यथाहुःकामंदकः सहायाःसाधनोपायाविभागोदेशकालयोः विनिपातप्रतीकारःसिद्धिःपंचांगमिष्यतेइतिपंचानामंगानांविनिर्णयः तद्धितार्थेत्यादिनाउत्तरपदसमासः कृतःपंचांगविनिर्णयोयस्य सतथोक्तः नयोनीतिशास्त्रमितियावत् कोशोऽर्थराशिः कोशोऽस्त्रीकुड्मलेरवद्वृपिधानेऽौषधिद्रव्ययोरित्यमरः दंडश्चतु

प्रभवःखलुकोशदंडयोःकृतपंचांगविनिर्णयोनयः
सविधेयपदेषुदक्षतांनियतिर्लोकइवानुरुध्यते १२

रंगसैन्यं दंडोऽस्त्रीशासनेसंज्ञांहिंसायांलगुडेयमे यात्राज्ञायांसैन्यभेदेइतिवैजयंती तयोःकोशदंडयोःप्रभुशक्तेरित्यर्थः प्रभवत्यस्माद्धितिप्रभवः कारणंरुद्रोरप्यसनयःनीतिशास्त्रं विधेयपदेषुकार्यवस्तुषुपदंव्यवसितत्राणस्थानलक्ष्मांधिवस्तुषुइत्यमरः दक्षतांक्षिप्रकारित्वमुत्साहंइत्यर्थः लोकः कुंभ्यादिप्रवृत्तोजनः नियतिर्दैवमिव नियतिर्नियमेदैवेइतिविश्वः अनुरुध्यतेअनुसरति रुधेर्दैवादिकात्कर्तरिलिट् मंत्रस्यापिमूलमुत्साहस्तन्मूलायाःप्रभुशक्तेःमूलमिति किमु वक्तव्यं अतःसएवाश्रयणीयः यतोनक्तंदिवंमंत्रयतः तस्यापिप्रभोर्निरुत्साहस्यनकिंचित्सिध्यतीतिभावः १२ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथयदिदैवात्स्वयमेवदुर्योधनः संपद्दास्यतितथापितत्कथंरोचतेनहीत्याह हिषतेति अथवाहिषतादुर्योधनेनविहितंसमर्पितमित्यर्थः आत्मनःपदंराज्यं पुनरपित्वयालब्धालप्स्यतेयदि लभेः कर्मणिलुट् हेजननाथ तवानुजन्मनांअनुजानां आविष्कृतपौरुषैःप्रकटितपराक्रमैः भुजैःकृतमलंव्यर्थमितियावत् अस्मद्भुजैर्नकिंचित्साध्यंइत्यर्थः राज्यदानादानयोःहिषता

सर्ग २

हिषताविहितंत्वयाथवायदिलब्धापुनरात्मनःपदं
जननाथतवानुजन्मनांकृतमाविष्कृतपौरुषैर्भुजैः १३

मेवस्वातंत्र्ये अस्मद्भुजनैष्फल्यात्क्षत्रियस्यविजितमितिशास्त्रात्क्षात्त्रेणैवराज्यंग्राह्यमितिभावः कृतमितिप्रतिषेधार्थमन्ययंचाद्दिषुपठ्यते कृतमितिनिवारणनिषेधयोरिति गम्यमानसाधनक्रियापेक्षयाकरणत्वात्तृतीया उक्तंच न्यासोद्योतेनकेवलंश्रूयमाणेवक्रियानिमित्तंकारकभावस्यापितुगम्यमानापीति १३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननुसोत्साहस्यासहायस्यकथमर्थसिद्धिरित्यतआह अभिमानवतइति अभिमानवतःमानधनस्य प्रियमिष्टं उच्चैरुन्नतं पदंस्थानंराज्यादिकंआरुरुक्षतः आरोढुमिच्छतःप्राप्तुकामस्यमनस्विनोधीरस्यात्मपौरुषंस्वपुरुषकारएवविनिपातनिवर्तनक्षमं अनर्थप्रतिकारसमर्थं आलंबनंसहकारि मतंइष्टं यथाकस्यचित्तुरंगमारोहतः किंचित्स्खलनप्रतिबंधकानुचरहस्तादिकमालंबनंनहूदितिध्वनिः किंपौरुषादन्यैःसहायैःशूराणामितिभावः १४ पौरुषानंगीकारेदोषमाह विप

अभिमानवतोमनस्विनःप्रियमुच्चैःपदमारुरुक्षतः विनिपातनिवर्त्तनक्षमंमतमालंबनमात्मपौरुषं १४
विपदोऽभिभवंत्यविक्रमंरहयत्यापदुपेतमायतिः नियताल्पगुतानिरायतेरगरीयान्नपदंनृपश्रियः १५

दइति अविक्रमंपौरुषहीनं विपदोऽभिभवंतितिरस्कुर्वंति आपदुपेतंविपन्नं आयातिःउत्तरकालःउत्तरःकालआयतिरित्यमरः रहयतित्यजति निरायतेरासन्नक्षयस्येत्यर्थः लघुतागौरवं नियताअवश्यंभाविनी नकश्चिदेनमाद्रीयतइत्यर्थः अगरीयान् लघीयान् नृपश्रियःपदं राज्यलक्ष्म्याः आस्पदं नभवति यद्वा नृपेतिपदच्छेदः तस्मात्पौरुषंकर्तव्यमेवेत्यर्थः अत्रपूर्वस्याविक्रमत्वादेरुत्तरोत्तरंविपदादिकंप्रतिकारणत्वात्कारणमालारत्नोलंकारः तथाचसूत्रं पूर्वपूर्वस्योत्तरोत्तरहेतुत्वेकारणमालेति १५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

फलितमाह तदिति तत्तस्मादुपेक्षायांदोषसंभवादित्यर्थः उन्नतेरभ्युदयस्य प्रतिपक्षमंतरायंव्यवसायवध्यतां उद्योगशून्यतामवलंब्य अलंउद्योगशून्यतावलंबनेनालमित्यर्थः अलंखल्वोः प्रतिषेधयोः प्राचांक्ते नित्क्रामत्ययः तस्यत्यबादेशः तथाहिपराक्रमः आश्रयः कारणंयासांताः तथोक्ताः समृद्धयःसंपदः विषादेनसमं अनुत्साहेनसहननिवसंतिपौरुषेय साध्याःसंपदोनानुद्योगसाध्याउभयोः सहावस्थानविरोधादित्यर्थः वैधर्म्येणकार्यकारणरूपोऽर्थांतरन्यासः १६ ननु

तदलंप्रतिपक्षमुन्नतेरवलंब्यव्यवसायवध्यतां निवसंतिपराक्रमाश्रयानविषादेनसमंसमृद्धयः १६
अथचेदवधिःप्रतीक्ष्यतेकथमाविष्कृतजिह्मवृत्तिना धृतराष्ट्रसूतेनसत्यजाश्चिरमास्वाद्यनरेंद्रसंपदः १७

समयःप्रतीक्ष्यतेकिंवेगेनइत्यत्राह अथेति अथावधिःकालःप्रतीक्ष्यतेचेत् अवधिस्त्ववसानेस्यात्सीम्निकालेबलेपिचे तिविश्वः आविष्कृतजिह्मवृत्तिनाप्रकटितकपटव्यवहारेण धृतराष्ट्रसूतेनदुर्योधनेन नरेंद्रसंपदोराज्यसंपदः नरेंद्रेति वापदच्छेदः चिरंचतुर्दशवर्षाण्यास्वाद्यानुभूय कथंसूत्यजाः ज्ञातस्वादेनतेनपश्चादपिसंपदोयुद्धक्लेशंविनानत्यक्ष्यं तएवेत्यवधिप्रतीक्षणंव्यर्थमित्यर्थः १७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननुसाम्नैवकार्यसिद्धौकिंक्षात्रेण यथाहमनुः साम्नादानेनभेदेनसमस्तैरथवाऽपृथक् विजेतुंप्रयतेतारीन्नयुद्धेनकदाचने-
तिनत्किमायुद्धेणेत्याह मदेति मृगाधिपःसिंहोमदसिक्तसुरवैः मदवर्षिभिरित्यर्थः स्वयंस्वैनैवहृतैः करिभिर्वर्तयतेवृत्तिं
करोति तैरेवजीवतीत्यर्थः चौरादिकात्तृत्तेर्णिच् भौवादिकस्यतु अणावकर्मकाच्चित्तवत्कर्तृकादिति परस्मैपद-

मदसिक्तसुरवैर्मृगाधिपःकरिभिर्वर्तयतेस्वयंहृतैः
लघयन्नरवल्लुतेजसाजगन्नमहानिच्छतिभूतिमन्यतः १८

नियमादिति तथाहि तेजसाप्रभावेणतेजोबलेप्रभावेचज्योतिष्यर्चिषिरेतसीतिवैजयंती जगल्लघयन् लघुकुर्वन्
महानन्यतोन्यस्मात्पुरुषात् भूतिंवृद्धिं नेच्छतिरवलु नहितेजस्विनःपरायत्तवृत्तिंलंयुक्तंमनुक्त्वनंतु अशूरविषय
मितिभावः विशेषेणवक्ष्यमाणसामान्यसमर्थनरूपोऽर्थांतरन्यासः १८ ७ ७

ननुसुखात्पाक्षिकोलक्ष्मीलाभःउपायांतरैरप्यनुनतथेत्याशंक्याह अभिमानेति अभिमानधनस्यवैरिनिर्यातनमेवधनं यस्येत्यर्थः अतएवगत्वरैःगमनशीलैःअस्थिरैःगत्वरश्चेतिकरबंतंनिपातनं असृग्भिःप्राणैःकरणैःपुंसिभूम्न्यसवः प्राणाइत्यमरः स्थास्नुस्थिरं यशश्चिचीषतः चेतुंसंग्रहीतुमिच्छतः ग्लाजिस्थश्नुक्रुशितिस्नुप्रत्ययः चिनो-

अभिमानधनस्यगत्वरैरसृग्भिःस्थास्नुयशश्चिचीषतः
अचिराभविलासचंचलाननुलक्ष्मीःफलमानुषंगिकं १९

नेःसन्नंतात्शतृप्रत्ययः अचिरंअंशवोयस्याःसाअचिरांशुर्विद्युत्तस्याःविलासःस्फुरणंतद्वच्चंचलाक्षिणिकेत्यर्थः लक्ष्मीःसंपत् अनुषंगादागतंआनुषंकं अन्वाचयशिष्टंफलं मानत्राणजंयशएवमुख्यंफलं अभ्युच्चयस्तुलक्ष्मी रितिमानिनांमानएवश्लाघ्यइत्यर्थः अत्रास्थिरप्राणत्यागेनस्थिरयशःस्वीकाराभिधानात्न्यूनाधिकविनिमया-रूप्यःपरिवृत्त्यलंकारः उक्तंचकाव्यप्रकाशे परिवृत्तिर्विनिमयोयोर्थानांस्यात्समासमैरिति १९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नन्चल्पस्यमानस्यहेतोःकथंप्राणत्यागःशक्यतेकर्तुंयतोजीवन्नरोभद्राणानिपश्यतीत्याशंक्याह ज्वलितमिति जनोभस्म नांचय मास्कदतिपादादिनाआक्रमति अदाहकत्वादितिभावः ज्वलितंज्वलंतंकर्तरिक्तः मतिबुद्धीत्यादिसूत्रेचकाराद्वर्तमानार्थत्वं हिरण्यं रेतोयस्यतंहिरण्यरेतसंअग्निं न आस्कंदति दाहकत्वादितिभावः अतोहेतोर्मानिनः अभिभूतिभयात्प्राणलोभेनतेजस्त्यागेपरिभवोभविष्यतीतिभयाद्सूनवःसूरयसुक्कं उज्झंतित्यजंति धामतेजस्तुनोज्झंति मा

ज्वलितंनहिरण्यरेतसंचयमास्कंदतिभस्मनांजनः अभिभूतिभयादसूनतःसूरयसुज्झंतिनधाममानिनः२०
किमपेक्ष्यफलंपयोधरान्ध्वनतःप्रार्थयतेमृगाधिपः प्रकृतिःखलुसामहीयसःसहतेनान्यसमुन्नतिंयया २१

नहानिकराज्जीवनात्स्वतेजसामरणमेववरमित्यर्थः पूर्वश्लोकवत् अर्थांतरन्यासः २०अथवाकिमत्रप्रयोजनचिंतया किंतुतेनास्विनामेवायंस्वभावोयज्जिगीषुत्वमित्याह किमिति मृगाधिपःसिंहः किंफलंप्रयोजनं अपेक्ष्य ध्वनतोगर्जतः धरंतीतिधराः पचाद्यत् पयसोधरान्पयोधरान् मेघान्प्रार्थयते अभियाति याच्ञासामभियानेचप्रार्थनाकथ्यतेबुधैरितिकेशवः अथवाऽवरुणद्धीत्यर्थः प्रार्थयनद्रति अभियाच्ञावरोधयोरित्यभिधानात् तथाहि महीयसोमहत्तरस्य साप्रकृतिः खलु यया प्रकृत्या अन्यसमुन्नतिंपरवृद्धिंनसहते महतांपरभंजनमेवपुरुषार्थइत्यर्थः पूर्ववदलंकारः २१ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संप्रतिउक्तप्रयोजनंनिगमयति कुरुनद्रिति हेनृप तत्तस्मात् उक्तरीत्यापराक्रमावसरत्वाद्धेतोः यत्तद्यतस्ततोहेतावित्यमरः
प्रमादजं तमोमोहं निर्धूयनिरस्य विक्रमे पौरुषेएव मतिंकुरु विक्रममेवांगीकुरुनत्वुपायांतरमित्यर्थः नचविक्रमेवैकल्य
मित्याह ध्रुवमिति विद्विषांविपत्तयस्त्वदनुत्साहहताः तवानुत्साहेनाव्यवसायेनहताः प्रतिबद्धाः अन्यथाग्रागेवविपद्येर
न्नितिभावः इत्येतद्ध्रुवंनिश्चितं अवेहिविद्धि ध्रुवंनित्येनिश्चितेचेतिशाश्वतः २२ नचनःपराजयशंकाकार्येत्याह द्वि

कुरुतन्मतिमेवविक्रमेनृपनिर्धूयतमःप्रमादजं ध्रुवमेतदवेहिविद्विषांत्वदनुत्साहहताविपत्तयः २२
द्विरदानिवदिग्विभावितांश्चतुरस्तोयनिधीनिवायतः प्रसहेतरणेतवानुजान्द्विषतांकःशतमन्युतेजसः२३

रदानिति दिग्विभावितान्दिक्षुप्रसिद्धान् तानायतःआगच्छतः आङ्पूर्वादिणधातोःशतृप्रत्ययः चतुरोद्विरदान्दिग्ग
जान्इवतथोक्तविशेषणान् चतुरस्तोयनिधीनिवरणे आयतःदिक्विभावितान् शतमन्युतेजसः इंद्रविक्रमान् च
तुरस्तवानुजान् द्विषतांमध्येकः प्रसहेनसोढुंशक्नुयादित्यर्थः शकिलिङ् चेतिशक्यार्थेलिङ् अतोनिःशंकंप्र
वर्तस्वेतिभावः २३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आशीर्वादव्याजेनफलितमाह ज्वलतइति तवचेतसि सततंनिरंतरं ज्वलतोवैरिकृतस्यजातवेदसःक्रोधाग्नेरित्यर्थः शिवे तरा अशिवाइत्यर्थः अमंगलावैधव्यदुःखजनकत्वादितिभावः रिपुनारीनयनांबुसंततिः वैरिवनिताश्रुप्रवाहः शमंवि दधातु वैरिकृतस्यास्यवैरिवधमंतरेणशांत्यसंभवाद्वध्योयंतद्वधस्त्वयाकर्तव्यइत्यर्थः क्रोधस्यविषयस्यनिगरणेनवि

ज्वलतस्तवजातवेदसःसततंवैरिकृतस्यचेतसि
विदधातुशमंशिवेतरारिपुनारीनयनांबुसंततिः२४

षयिणोजातवेदसएवोपनिबंधनादतिशयोक्तिरलंकारः तदुक्तं विषयस्यानुपादानात् विषय्युपनिबध्यते यत्रसातिशयो क्तिः स्यात्कवेःप्रौढोक्तिजीवितेति तत्रापिक्रोधस्यजातवेदसोभेदेष्वभेदाध्यवसायात् भेदेःभेदरूपा ततएवांबुनिर्वा-प्यत्वोक्तिश्चबध्यते तथाच यथांबुसेकेनाग्निःसम्यक्शाम्यति तथाशत्रुवधेनक्रोधइत्योपम्यंगम्यते २४ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवंभीमेनसंरब्धेयुधिष्ठिरःउपसांत्वयन्नाह इतीति इत्युक्तरीत्या दर्शितविक्रियाकोपविकारोवागारंभात्मकोयेनतंकोप परीतमानसंकोपाक्रांतचित्तं इदंविशेषणद्वयंद्विरदेपियोज्यं मरुतःसूतंभीमं महीपतिर्युधिष्ठिरोदुष्टंद्विरदमिव एने-

इतिदर्शितविक्रियंसूतंमरुतःकोपपरीतमानसं
उपसांत्वयितुंमहीपतिर्द्विरदंदुष्टमिवोपचक्रमे २५

नास्यशौर्यमेवनबुद्धिरस्ति इतिगम्यते उपसांत्वयितुं अनुनेतुमुपचक्रमेप्रवृत्तः प्रोपाभ्यांसमर्थाभ्यामित्यात्मनेपदं राज्ञा भान्युपकारविशेषापेक्षयाकथंचिदवश्योजनःशनैःद्विरदवद्वशीकरणीयोनतुत्याज्यइतिभावः २५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रथमंतावत्स्तुत्यादिभिः प्रसादयति अपवर्जितेति विप्लवःप्रमाणबाधः अन्यत्रवात्यमलसंक्रमःसोपवर्जितोयस्यतस्मिन्नपवर्जितविप्लवे शश्वौशश्चिःशब्दसौष्टवंलोहशब्दिश्चनद्रुति अतएवहृदयग्राहिणिमनोरमे मंगलास्पदेएकत्रहिता र्थप्रतिपादकत्वादन्यत्रमंगलवस्तुत्वाच्चश्रेयस्करेरोचनंचंदनंहेममृदंगदर्पणंमणिं गुरुमिंनथासूर्यप्रातःपश्येत्सदाबुध

अपवर्जितविप्लवेशश्वौत्हृदयग्राहिणिमंगलास्पदे
विमलानवविस्तरेगिरांमतिरादर्शइवाभिदृश्यते २६

इतिपुराणवचनात् नवगिरांविस्तरेवाक्यप्रपंचेग्रथनेवावशब्दइतियज्प्रतिषेधात् भ्रुद्वोरवित्यप् अतएवविस्तारोविग्रहोव्यासःसतुशब्दस्यविस्तरइत्यमरः मतिस्त्वबुद्धिरादर्शेदर्पणइव दर्पणेमुकुरादर्शावित्यमरः विमलाविशदा अभिदृश्यतेवाग्वैशद्यादेवमतिवैशद्यमनुमीयते तत्पूर्वकत्वात्तस्येत्यर्थः २६ ७ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथयुग्मेनाह स्फुटतेति उपपत्तिरितिच पदैःस्फुतिङंतशब्दैःस्फुटताविशदार्थता अनपाकृतानत्यक्ता अर्थगौरवं अर्थस्फु-
यस्त्वंवानत्वनस्वीकृतंस्वीकृतमेवेत्यर्थः वैशद्यप्रसक्तार्थगौरवाभावनिवर्तनार्थंनञ्द्वयंसंभाव्यनिषेधनिवर्तनेद्वौप्रतिषेधा
वितिवामनः गिरांपदानां अवांतरवाक्यानांच स्थगर्थताभिन्नार्थता अपुनरुक्तार्थतेतियावत् रचिताकृता यथाक्वचिदपि
सामर्थ्यंगिरांअन्योन्यसामर्थ्यसाकांक्षत्वन्नापोहितन्नवर्जितं नत्यक्तं अन्यथादशदाडिमादिशब्दवदेकवाक्यतानस्यात्

स्फुटतानपदैरपाकृतानत्वनस्वीकृतमर्थगौरवम्
रचितास्थगर्थतागिरान्नचसामर्थ्यमपोहितंक्वचित् २७

यथाहुः अर्थैकत्वादेकवाक्यंसापेक्षंचेद्विभागेस्यादिति ननु अर्थगौरवमित्यत्रकथंषष्ठीसमासः पूरणगुणेत्यादिनाप्रति-
षेधानेषदोषः येशब्दाद्यःशब्दाःगुणेगुणिनिचवर्तंते यथापटस्यशुक्लंशुक्लुःपटइतिच तेषामेवात्रनिषेधात् येचस-
द्गुणमात्रवचनाःयथागौरवंधान्यंरसोगंधस्यस्पर्शइत्येवमाद्यस्तेषामनिषेधात् यथा तत्स्थेत्यगुणेःषष्ठीसमस्यतद्
तिवचनात् बहुलमभियुक्तप्रयोगदर्शनाच्च बलाकायाःशौक्ल्यमित्यादौतुभाष्यकारवचनाद्समासः अतएवाहवाम
नः अत्रापीतिमादिषुगुणवचनसमासोबलीयान्स्यादिति २७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उपपत्तिरिति किंच बलात्त्वबलमाश्रित्यकर्मणिल्यप्लोपेपंचमीवक्तव्या उपपत्तिर्युक्तिरुदाहृता परात्रमपक्षएवश्रेयानि
तियुक्तिरुक्तेत्यर्थः उचितंचैतन्महावीरस्येतिभावः तथा अनुमानेनयुक्त्या आगमःशास्त्रं नक्षतोनहतः किंत्वागमा
विरुद्धमेवोक्तं अन्यथातद्विरोधादनुमानस्यैवाप्रामाण्यप्रसंगादितिभावः ईदृक्इत्थंक्षात्रयुक्तमिदंवचनं अविद्व-

उपपत्तिरुदाहृताबलादनुमाननचागमःक्षतः
इदमीदृगनीदृगाशयःप्रसभंवक्तुमुपक्रमेतकः२८

मानईदृक्इत्थंक्षात्रयुक्तमभिप्रायोयस्यसअनीदृगाशयः अभिप्रायश्छंदआशयइत्यमरः कःप्रसभंहठात्वक्तुंउपक्रमेत
नकोपीत्यर्थः इत्थंवक्तुमुपक्रमितेवनाग्निवक्त्रात्तुदुरापास्तएवेतिभावः केचिदेतत्श्लोकत्रयंनिंदापरत्वेनापियोजयंति
तदसत्तद्धिनोपदेशमात्रनस्यरस्यातिवत्सलस्यराज्ञोमत्सरिणइवमहावीरेभानरिविधेयेसर्वानर्थमूलभूतनिंदातात्पर्यकल्पनानौ
चित्यादितिर२८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यदिसाधूक्तंतर्हितयैवक्रियतामित्याशंक्याह अवितृप्ततयेति तथापित्वयासम्यक् निर्णीतेपिमेत्दृदयमवितृप्ततया असंतुष्टतयाअद्यापिसंशयगतत्वेनेत्यर्थः निर्णयमेवधावत्यनुसरति अपेक्षतइतियावत् अद्यापिनिर्णयस्यअनुदयादिति भावः निर्णयानुदयेहेतुमाह अवेति विधेयेषुसंधिविग्रहादिकर्तव्यार्थेषुयाविशेषसंपदः अवांतरभेदसमृद्धिबाहु

अवितृप्ततयातथापिमेत्दृदयंनिर्णयमेवधावति
अवसाययितुंक्षमाःसखंनविधेयेषुविशेषसंपदः२९

ल्यानि नाःसखवमक्लेशेनावसाययितुंपुरुषान्प्रत्यानुकूल्येनस्वस्वरूपंस्वयमेवशीघ्रंप्रत्याययितुमित्यर्थः स्यतेर्ण्यंताद्पिकर्मकर्तृत्वात्तुमुन्क्षमंतइति क्षमाःशक्तानभवंति क्षमंशक्तेहितेत्रिषित्यमरः विधेयमात्रस्यसुगमत्वेपितद्विशेषाणांसौक्ष्म्यात् बाहुल्याच्चदुर्ज्ञेयत्वाद्यापिनिर्णयाकांक्षेतितात्पर्यार्थः अत्रनिर्णयधावनंप्रत्युत्तरवाक्यार्थस्यहेतुत्वाभिधानात् वाक्यार्थहेतुकंकाव्यलिंगमलंकारः तदुक्तं हेतोर्वाक्यपदार्थत्वेकाव्यलिंगमुदाहृतमिति २९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वस्तुविशेषावधारणमंतरेणैवप्रवृत्तिरित्याशंक्याह सहसेति क्रियतइतिक्रियाकार्यंसहसाअविमृश्येत्यर्थः सहसेत्योक्त्या
क्रियाविमर्शयोरितिगणव्याख्यानेस्वरादिपाठाद्व्ययं नविदधीतनकुर्यात् कृतअविवेकःअविमृश्यकारित्वंपरमत्यंतमा
पदांपदंस्थानंविपत्तिकारणमित्यर्थः व्यतिरेकेणोक्तमर्थमन्वयेनाह वृणतइतिगुणलुब्धागुणगृद्ध्यागुणगर्भवइतिस्वयं-

सहसाविदधीतनक्रियामविवेकःपरमापरमापदांपदं
वृणतेहिविमृश्यकारिणंगुणलुब्धास्वयमेवसंपदः ३०

वरणहेतूक्तिः संपदश्चियः विमृश्यकरोतीतिविमृश्यकारीउपपदमतिङिति समासः तंस्वयमेववृणतेभजंते वृङ् संभक्ता-
विनिधातुः तस्माद्विमृश्यैवप्रवर्तितव्यमित्यर्थः अत्रसहसाविधाननिषेधलभ्यविमृश्यकारित्वरूपकारणस्यापद्रूपव्यति
रेककार्येणसमर्थनाद्वैधर्म्येणार्थांतरन्यासः द्वितीयार्द्धेनत्वसएवसाधर्म्येणेतिज्ञेयं ३० ७ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननुसाहसिकस्यापिफलसिद्धिर्दृश्यतएवतत्किंविवेकेनेत्यत्राह अभीति यःपुमान् विधीयंतइतिविधयःकृत्यवस्तूनिबी
जानीवेत्युपमितसमासः शरदंलोकइवेति वाक्यगतोपमानुसारात् तानिविधिबीजानिविवेकोवारीवविवेकवारिनेनवि
वेकवारिणापूर्ववत्समासः अनुपालयन्प्रतीक्षमाणःसंरक्षन्नयः अभिवर्षतिसिंचति सपुमान् फलंसाधननिष्पाद्यो

अभिवर्षतियोनुपालयंश्चविधिबीजानिविवेकवारिणा
ससदाफलशालिनींक्रियांशरदंलोकइवाधितिष्ठति ३१

र्थःसस्यंच फलंहेतुकृतेसस्यइत्युभयत्राप्यमरः तच्छालिनींक्रियांकर्म लोकोजनः लोकस्तुभुवनेजनइत्यमरः शरदमिव
सदाधितिष्ठति सदाक्रियाफलंप्राप्नोत्येव नकदाचिद्व्यभिचरतीत्यर्थः साहसिकस्यकाकतालीयासिद्धिःविवेकिनस्तुनिय
तेतिभावः अत्रफलशब्देनसस्यहेतुकृतयोरर्थयोरभेदाध्यवसायात् श्लेषमूलातिशयोक्तिः तदनुगृहीताचोपमेत्यनुसंधेयं ३१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नियतविवेकिनः फलसिद्धिरित्युक्तं संप्रतिनामैवकृच्यर्थस्तोति शुचीति शुचिसंप्रदायशुद्धं श्रुतंशास्त्रश्रवणं कर्तृ वपुर्भूषय
ति अन्यथा अविद्वान्पुरुषःशोच्यइतिभावः तस्यश्रुतस्य प्रशमःक्रोधोपशांतिः अलंक्रिया भूषणंभवति अन्यथाश्रुतिर्वै
फल्यादितिभावः पराक्रमः सत्यमत्सरेशौर्यं प्रशमस्याभरणंभवति अन्यथासर्वैःपरिभूयतइतिभावः सपराक्रमः नया-

शुचिभूषयतिश्रुतंवपुःप्रशमस्तस्यभवत्यलंक्रिया
प्रशमाभरणंपराक्रमःसनयापादितसिद्धिभूषणः ३२

पादितानीतिसंपादितविवेकपूर्विकेतियावत् साचासौसिद्धिश्च सैवभूषणंयस्यसतथोक्तः अन्यथासाहसिकस्यसिद्धेः
काकतालीयत्वेन पक्षेपराक्रमवैयर्थ्यादितिभावः वपुषोभूष्यतेवात्रसिद्धेर्भूषणतेवतु उभयंमध्यमानांतुल्यात्पूर्वोत्तरप-
क्षयोरितिविवेकः एवंविशिष्टसिद्धेरनन्यभूषितायाएवभूषणत्वोक्त्या सर्वाभरणनयास्तुनिर्गम्यते अत्रोत्तरोत्तरस्यपूर्व
पूर्वविशेषणत्वात्एकावल्यलंकारः तदुक्तं यत्रविशेषणभावं पूर्वपूर्वंप्रतिक्रमेणैव भजतिपरंपरमेवालंकृतिरेकावलीकथितैनि
३२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विमृश्यकुर्यादितिस्थिरं तत्रविमर्शोपायः कइत्युक्तेशास्त्रमेवेत्याह मतीति मतिभेदः कार्यविप्रतिपत्तिः मतिभेदस्तमइवेत्युपमितसमासः दीपइवेत्युपमानानुसारात्तेनतिरोहितेऽतएवगहनेदुरवगाहे कृत्यविधौ कार्यानुष्ठानेविवेकिनांसकृतः स्वभ्यस्तः अतएवपरिशुद्धोनिश्चितोन्यत्रसंविहितः प्रमादाद्दोषरहितः आगमःशास्त्रं आगमःशास्त्रमाम्नायइतिविश्वः दीपइवार्थदर्शनं कार्यज्ञानंवस्तुप्रतिभासनंचकुरुते ३३ एवंविमृश्यकुर्वतोदैवादर्थनाशेपिनकश्चित्परिभवइत्याह स्पृहणीयेति स्पृहणीय

मतिभेदतमास्तिरोहितेगहनेकृत्यविधौविवेकिनां सकृतःपरिशुद्ध-
आगमःकुरुतेदीपइवार्थदर्शनं ३३ स्पृहणीयगुणैर्महात्मभिश्चरिते
वर्त्मनियच्छतांमनः विधिहेतुरहेतुरागसांविनिपातोपिसमःसमुन्नतेः ३४

गुणैर्लोकश्लाघ्यगुणैर्महात्मभिःसज्जनैः चरितेअनुष्ठितेवर्त्मनिआचारेमनोयच्छतांनिदधतां सन्मार्गेणव्यवहरतामित्यर्थः विधिहेतुर्दैवनिमित्तकः विधिर्विधानेदैवेचेत्यमरः अतएवागसां अपराधानामहेतुः विनिपातोपिदैविकानर्थोपि विनिपातोवपातेस्यादैवादिव्यसनेपिचेतिविश्वः समुन्नतेर्वृद्धेःसमःतुल्यः दैविकेपुरुषस्यानुपालभ्यत्वादितिभावः यथाहकामंदकः यत्तुसम्यगुपक्रांतंकार्यमेतिविपर्ययं पुमांस्तत्रानुपालभ्योदैवांतरितपौरुषइति ३४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संप्रतियद्दिस्मृश्यंतदाह शिवमिति जिगीषवोजयेच्छवोनृपाः विजितक्रोधरयाः विजितक्रोधवेगाः संतोगरीयसींप्रभू -
तां अदूषितायतिं आक्षतोत्तरकालांस्वंतामित्यर्थः फलनिष्पत्तिंफलसिद्धिं विगणय्यफलवत्वंनिश्चित्येत्यर्थः पौरुषंपु-
रुषकारंशिवमनुकूलं औपयिकंउपायं विनयादित्वात्स्वार्थेठक् उपायात्ह्रस्वत्वंच नयंतिमापयंति पौरुषमुपायेन
च जयंतीत्यर्थः नानिश्चितफलंकर्मकुर्वीतेतिभावः यथाहकामंदकः निःफलंक्लेशबहुलंसंदिग्धफलमेवच नकर्मकुर्या

शिवमौपयिकंगरीयसींफलनिष्पत्तिमदूषितायतिं विगणय्यनयंतिपौरुषंविजितक्रोधरयाजिगीषवः३५
अपनेयमुदेतुमिच्छतातिमिरंरोषमयंधियापुरः अविभिद्यनिशाकृतंतमःप्रभयानांशुमतापुदीयते ३६

न्मतिमास्मदावैरानुबंधिचेति नयतिःप्रापणार्थोहूकर्मकः अत्रपौरुषस्यकर्तस्थकर्मस्थेषुपायस्यतथात्वात्क्रोधंविनयतइत्या
दिवत् कर्तस्थेचाशरीरेकर्मणीत्यात्मनेपदंनभवति ३५ यदुक्तंविजितक्रोधरयाइति तदावश्यकत्वमाह अपनेयमिति उदेतुंअ
भ्युदेतुंइच्छतापुरुषेणपुरःप्रथमं रोषमयंरोषादागतं मयट्इति मयट् तिमिरमज्ञानं धियाबुध्या करणेनापनेयं अपनोद्यं
तथाहि अंशुमतापिकर्त्राप्रभयातेजसाकरणेननिशाकृतंतमोध्वांतमविभिद्यनोदीयते किंतुविभिद्यैवेत्यर्थः सूर्यस्या-
प्येवंकिमुतान्येषामित्यपिशब्दार्थः ट्णोभावेलट् ३६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननुदुर्बलस्यैवमस्तुबलीयसस्तुक्रोधादेवकार्यसिद्धिरित्यतआह बलवानिति बलवान्शूरोपि यःकोपाज्जन्मयस्यतस्य-
कोपजन्मनः अवर्ज्यबहुव्रीहिर्व्यधिकरणोजन्माद्युत्तरपदइतिवामनः तमसोमोहस्य कृद्योगात्कर्मणिषष्ठी अभिभव
मात्क्रांतिंनरुणद्धि सन्नपः क्षयस्यपक्षः क्षयपक्षः कृष्णपक्षः ऐंदवीः इंदुसंबंधिनीः कलाइव कलातुषोडशोभागइत्यमरः
सकलाः शक्तिसंपदः प्रभुमंत्रोत्साहशक्तीः हंतिनाशयति अंधस्यजंघाबलमिवक्रोधांधस्यलोकोत्तरमपिसामर्थ्यंव्य-

बलवानपिकोपजन्मनस्तमसोनाभिभवंरुणद्धियः क्षयपक्षइवैंदवीःकलाःसकलाहंतिसशक्तिसंपदः ३७
समवृत्तिरुपैतिमार्दवंसमयेयश्चतनोतितिग्मतां अधितिष्ठतिलोकमोजसास्विवरत्नानिवमेदिनीपतिः३८

र्थमेवेत्यर्थः अत्रकालस्यसर्वकरणत्वात् क्षयपक्षस्यकलाक्षयकारित्वमस्त्वेवतमसस्तुनत्कालविजृंभणात्तथाव्यप
देशः ३७ विमृश्यकुर्वतःक्रियाप्रकारमाह समेति यःसमानातिमृदुर्नत्यति तिग्मावृत्तिर्यस्यससमवृत्तिः सन् समयेस
त्यवसरे मार्दवंमृदुवृत्तित्वमुपैति तिग्मतांतीक्ष्णवृत्तित्वंचतनोतिसमेदिनीपतिर्विवस्वानिव ओजसा तेजसालोकम
धितिष्ठति आक्रमति सूर्योपिक्रतुभेदेनप्रातःकालादिनाचसमवृत्तिरित्यादिनायोज्यं ३८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उक्तान्यथाकरणेऽनिष्टमाह केति श्रियांसंपदांचिरायबहुकालंपरिग्रहःस्वायत्तीकरणंच इंद्रियाणिवाजिनइवेत्युपमितस
मासः दुष्टानांअमार्गधाविनांइंद्रियवाजिनांवश्योवशंगतस्तस्यभावस्तत्ताच्चनोभयमेकत्रतिष्ठतीत्यर्थः कुतः हियस्मात्-
शरदभ्रवच्चलाश्चंचलाः किंचबहुच्छलाःबहुव्याजाः बहुरंभाइतियावत् छलंतुस्खलितेव्याजइतिविश्वः श्रियः-
लक्ष्म्यः चलेंद्रियैरजितेंद्रियैरित्यर्थः असत्पक्षेरक्षितुमशक्याः कथंचित्प्राप्ताअपिश्रियोनाविनीतेषुतिष्ठंतीत्य

चिरायपरिग्रहश्रियांचदुष्टेंद्रियवाजिवश्यता शरदभ्रचलाश्चलेंद्रियैरसत्पक्षेरहिबहुच्छलाःश्रियः ३९
किमसामयिकंवितन्वतामनसःक्षोभमुपान्तरंहसः क्रियतेपतिरुच्चकैरपांभवताधीरतयाधरीकृतः ४०

र्थः वाक्यार्थहेतुकंकाव्यलिंगमलंकारः ३९ क्रोधस्यदुष्टतामुत्क्रान्तस्यत्यागमुपदिशति किमिति उपान्तरंहसः प्राप्तत्वरस्य मन
सः समयोस्यप्राप्तःसामयिकः समयस्तदस्यप्राप्तमितिठक् सनभवतीत्यसामयिकमप्राप्तकालंक्षोभंवितन्वताभवता धीरत
यार्धैर्यगुणेन मनसोनिर्विकारत्वंधैर्यं सत्त्वपिहेतुधिषितरसिकाः अधरीकृतः तिरस्कृतः प्राणिनिशेषः अपांपतिरपिकिंकिमर्थमु
च्चकैरधिकःक्रियते नपराजितंपुनरुच्चकैः दुर्यादितिभावः अत्रवितन्वतेतिभीमविशेषणत्वेन पदार्थस्योच्चैः करणेहेतुत्वात्काव्यलिंगमा
लंकारः४०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रुतमिति किंच येश्रुतंशास्त्रमधिगम्यापि शरीरजन्मनःशरीरप्रभवान् रिपून् कामक्रोधलोभमोहमत्सरादीन् विनयंतेननि
यच्छंति कर्तृस्थेचाशरीरेकर्मणीत्यात्मनेपदं तेरवल्वचिरायश्रुटितिसंपदांश्रियांचापलाश्रयमस्थैर्यनिबंधनमयशः दु
ष्कीर्तिंजनयंति आश्रयदोषादस्थैर्यंसंपदांनस्वदोषादित्यर्थः अजितारिषड्वर्गस्यकुतःसंपदइतिभावः ४१ तथापि

श्रुतमप्यधिगम्ययेरिपून्विनयंतेनशरीरजन्मनः जनयंत्यचिरायसंपदामयशस्तेरवलुचापलाश्रयम् ४१
अतिपातिनकालसाधनास्तशरीरेंद्रियवर्गतापनी जनवन्नभवंतमक्षमानयसिद्धेरपनेतुमर्हति ४२

क्रोधात्कार्यहानिरित्याशयेनाह अतिपातिनेति अतिपातिनान्यतिक्रांतानि कालःसमयः साधनानिसहायादीनिचयायासा
तथोक्तातापयतीतितापनी कर्तरिल्युट्टित्वात्ङीप् स्वस्ययच्छरीरमिंद्रियवर्गश्चतयोस्तापनी अक्षमाक्रोधोभवंतंज
नवत् स्थग्जनमिव तेनतुल्यमितिवतिप्रत्ययः तेनेवार्थोलक्ष्यते तद्धितश्चासर्वविभक्तिरित्यव्ययत्वम् नयसिद्धेः
नयसाध्यफलादपनेतुंस्थक्कर्तुंनार्हति असमयक्रोधस्यात्मसंतापातिरिक्तंफलंनास्तीत्यर्थः ४२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दुष्टःक्रोधइत्युक्तमथक्षमायागुणानाह उपकारकमिति आयतेरुत्तरकालस्य भृशमत्यंतमुपकारकं स्थिरफलहेतुरित्यर्थः भूरिणःप्रभूतस्यकर्मफलस्यप्रसूयतेः नेनेतिप्रसवःकारणं अपायिनभवतीत्यनपायिस्वयमविनश्यदेवदूषांनिबर्हणंवि नाशकं एवंगुणकंसाधनंतितिक्षासमं क्षमातुल्यं नास्तिक्षांतिःक्षमातितिक्षाचेत्यमरः तिजनिशानइतिधातोर्गसिञ्कि

उपकारकमायतेर्भृशंप्रसवःकर्मफलस्यभूरिणः
अनपायिनिबर्हणंदूषांनतितिक्षासममस्तिसाधनं ४३

ञ्यःसन्नितिक्षमार्थेवर्तमानात्सन्प्रत्ययः तितिक्षासममित्यनुक्तोपमेया आर्षीसमामागालुप्तोपमाभृशमनपायिशब्दैःसा धनांतरवैलक्षण्यात्व्यतिरेकस्त्वव्यज्यते भेदप्राधान्येउपमानादुपमेयस्याधिक्येविपर्ययेचव्यतिरेकालंकारइति तल्लक्षणात् ४३

ननुतितिक्षायाःकालक्षेपे दुर्योधनःसर्वान्राज्ञोवशीकुर्यादित्यत्राह प्रणतीति सहजस्नेहेनाकृत्रिमप्रेम्णानिबद्धचेतसो ऊ
स्मासुगाढंलग्नचित्ताःस्युर्योधनेतु ननथेतिभावः किंचमानभृतांअहंकारिणांप्रथमे अग्रेसराः स्युर्योधनस्तुननथेति-
भावः वृष्णयोयादवाः प्रणतिप्रणवान् प्रणामपरान् स्युर्योधनस्तुननथेतिभावः नोस्मान्विहायस्युर्योधनंसदानम्र-
णमंतिननमंति नअनुसरंति किंतुकार्यकालेत्यक्ष्यंतेवेत्यर्थः सतियादवानुकूल्येविघ्नेनकिंचिदस्माकमसाध्यंभवेदि

प्रवतिप्रवणान्विहायनःसहजप्रेमनिबद्धचेतसः प्रणमंतिसदास्योधनंप्रथमेमानभृतांनवृष्णयः ४४
स्नेहदःसहजास्तथेतरेमतमेषांनविलंघयंतिते विनयादिवयापयंतितेधृतराष्ट्रात्मजमात्मसिद्धये ४५

तिभावः अनेकपदार्थहेतुकंकाव्यलिंगमलंकारः ४४ किंचकारणांतरमाह स्नेहदइति किंचैषांवृष्णीनांयेसहजाःसहजा-
ताः सहजामात्मपित्रपक्षाइत्यर्थः अन्येषपिदृश्यतइतिडमत्ययः स्नेहदोमित्राणि तथाइतरेकृत्रिमस्नेहदश्च एषांमतं-
वृष्णिपक्षंनविलंघयंति नातिक्रामंति तेहूयेपिन्नपाःदुर्योधनोपजीविनोपीतिभावः आत्मसिद्धयेआत्मजीवनार्थं धृत
राष्ट्रात्मजंदुर्योधनंविनयादानुकूल्यादिवयापयंति कालंगमयंति कार्यकालेहिवृष्णिपक्षप्रवेशिनइत्यर्थः यातेर्णयना-
लुट् अर्तिह्रीत्यादिनापुगागमः ४५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंतुनायमभियोगकालइत्याशयेनाह अभियोगइति कृतावधेःपरिभाषितकालस्य अवधिरवसानेस्यात्सीम्निकालेब
लेपिचेतिविश्वः तस्यसाधनस्य कर्मणिषष्ठी भवताकृतः अवश्यंतइतिशेषः अभियोगःआहवः अभिमानइतियाव
त् अभियोगस्तुशपथेस्यादाहवपराभवाविति विश्वः इमान्पूर्वोक्तान्महीभृजोहरिद्भ्रवःउष्णरश्मिः कमलाकरानिव-
समुत्सतन्नुद्यन्नेवप्रविघाटयिता भेत्स्यति घटेम्बोरादिकालुट् भौवादिकस्यतुमितांह्रस्वइतिह्रस्वत्वंस्यात् ४६ अथ

अभियोगइमान्महीभृजोभवतानस्यकृतःकृतावधेः प्रविघाटयितासमुत्सतन्हरिद्भ्रवःकमलाकरानिव ४६
उपजापसहान्विलंघयन्सविधातान्नृपतीन्मदोद्धतः सहतेनजनोऽधःक्रियांकिमुलोकाधिकधामराजक ४७

नयेतृष्णिपक्षास्तान्प्रत्याह उपजापेति मदोद्धतःसदुर्योधनोनृपतीनन्यान्नृपान्विलंघयन्मदादवमानयन्सहंतइतिसहाःपचा
द्यत् उपजापस्यसहान्भेदयोग्यान् भेदोपजापावित्यमरः विधातानविधास्यति विपूर्वाद्दधातेर्लुट्सअमानितोजनः स्व
भेद्यइतिभावः नचतेसहिष्णवइत्याह प्राकृतोपिजनःअधःक्रियामपमानं नसहतेलोकाधिकधामलोकोत्तरप्रतापं राज
कंराजसमूहः गोत्रोद्भेत्यादिनावुञ्प्रत्ययः किमुसहतेपितुनेतिकिमुवक्तव्यमित्यर्थः तथाचकृत्स्नमेवराजमंडलमस्मा
नेवावलंबिष्यतेइतिभावः ४७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननुसरबीनिवेत्यादिवनेचरोक्त्यातस्यमदसंभावनापिकथमित्यत्राह असमापितेति असमापितकृत्यसंपदामकृतकृत्यानांतु तः अभिमानशालिनामहंकारिणां विभूतयःसंपदएवतावतास्वल्पेनविनयेनकार्यवशादारोपितेनेतिशेषः हतवेगंप्रतिबद्धवेगं ननुस्वरूपतोहतंमदमुत्तंभयितुंवर्धयितुंप्रभवंति समर्थाभवंति सर्वथादुर्जनसंपदोविकारयंतीतिभावः ४८

असमापितकृत्यसंपदांहतवेगंविनयेनतावता प्रभवंत्यभिमानशालिनांमदमुत्तंभयितुंविभूतयः ४८ मदमानसमुद्धतनृपंन-
विमुंचतिनियमेनमूढता अतिमूढउदस्यतेनयान्नयहीनादपरज्जतेजनः ४९

अथमदस्यानर्थहेतुतांयुग्मेनाह मदेति अपरागेतिच मदमानाभ्यांदर्पाहंकाराभ्यां समुद्धतंनृपंमूढताहंकारितयाकार्याकार्यपरिज्ञानलक्षणनियमेनावश्यंनविमुंचति अतिमूढोनयान्नीतिमार्गादुदस्यते उत्क्षिप्यते कर्मकर्तरिलिट् नयहीनाज्जनोलोकोपरज्यतेऽपरक्तोभवति स्थितत्वादात्मनेपदं ४९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अपरागेति अपरागोऽप्रीतिर्द्वेषइतियावत् समीरणइवतेनेरितश्चोदितः अतएवक्रमेणशीर्णाशीर्णीभूताअकुलाश्चलाश्च मूलसंततिः प्रकृत्यादिस्वजनवर्गः शिफासंघातश्चयस्यसतथोक्तः मूलंवशीकृतेस्वीयेशिफातारांतिकादिष्विति वैजयंती

अपरागसमीरणेरितः क्रमशीर्णाकुलमूलसंततिः
स्फुरस्तरुवत्सहिष्णुनारिपुरुन्मूलयितुंमहानपि ५०

रिपुर्महानपितरुवद्वृक्षइवसहिष्णुनाक्षमावताउन्मूलयितुमुद्धर्तुंस्फुरः स्फुसाध्यः स्फुस्फुरोन्मूलनइत्यर्थः अत्रमदादेः पूर्वपूर्वस्योत्तरोत्तरंप्रतिकारणत्वात् कारणमालातरुवदित्युपमान्चेतिद्वयोः संसृष्टिः ५० ७ ७

नन्वंतर्भेदमात्रेणकथंरूक्षसाध्यस्तत्राह अणुरिति अणुरल्पोप्यंतःप्रकृतिप्रकोपजोंतरंगामात्याद्यपरागस्समुत्थः प्रकृतिःपंच भूतेषुस्वभावेमूलकारणे छंदःकारणगुल्येषुजंतुमात्यादिकेष्वपीतिवैजयंती विग्रहोवैरंप्रभुमुपहंतिनाशयति अत्रद्दष्टांतमाह तरुशारवांतानांनिघर्षोघर्षणं तज्जोःनलोग्निः भूधरंगिरिमखिलंसाकल्येन हिनस्तिदहतीत्यर्थः अत्रोप-

सर्ग
२

अणुरप्युपहंतिविग्रहःप्रकृमंतःप्रकृतिप्रकोपजः अखिलंहिहिनस्तिभू
धरंतरुशारवांतनिघर्षजोनलः ५१ मतिमान्विनयप्रमाथिनःसमुपेक्षेत
समुन्नतिंद्विषः रूजयःखलुनादृगंतरेविपदंताह्यविनीतसंपदः ५२

मानोपमेयसमानधर्माणांबिंबप्रतिबिंबतयानिर्देशेनदृष्टांतालंकारः ५१ तथापिकथंवक्ष्यमानंशत्रुमुपेक्षेतदित्याशंक्यदुर्विनीतत्वादित्याह मतिमानिति मतिमान्प्राज्ञोविनयंप्रमथ्नातित्यजतीतितस्यविनयप्रमाथिनोदुर्विनीतस्यद्विषः समुन्नतिंवृद्धिमुपेक्षेत उपेक्षायाःफलमाह तादृगविनीत अंतरेकंचिद्भेरूजयः रूग्वेनजेतुंशक्यः खलु हियस्मादविनीतसंपदः विपदंताः अनर्थोदर्कीः ५२

१९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कथंदुर्विनितस्यशत्रोःस्फुजयत्वमित्याशंक्यभेदजर्जरितत्वादित्याह लघ्विति लघुवृत्तितयास्वस्यदुर्वृत्तरूपतयाबहिर्मित्रादि
षुजनपदेषुअंतरमात्यादिषुचभिद्यांभेदंगतं विद्विदादिभ्योऽङित्यङ्प्रत्ययः नृपस्यमंडलंराष्ट्रमनंतरःसन्निहितोजिगीषु
रापगारयोनदीवेगः शिथिलमंतर्भेदजर्जरं कूलमिवाभिभूयाक्रम्यहरतिस्वाधीनंकरोति ५३ अन्विति इतीत्थंआकु

लघुवृत्तितयाभिद्यांगतंबहिरंतश्चनृपस्यमंडलं अभिभूयहरत्यनंतरःशि
थिलकूलमिवापगारयः ५३ अनुशासतमित्यनाकुलंनयवर्त्माकुलमजु
नाग्रजः स्वयमर्थइवाभिवांछितस्तमभीयायपराशरात्मजः ५४

लंअरिनिकारस्मरणात्क्षुभितं अर्जुनाग्रजंभीमसेनं नयवर्त्मनीतिमार्गमनाकुलमसंकीर्णं यथास्यात्तथा अनुशासनंउप
दिशंतंजक्षित्यादयःषडित्यभ्यस्तानुनुमभावः तंयुधिष्ठिरंपराशरात्मजोवेदव्यासः स्वयमभिवांछितोर्थइवसाक्षान्मनो
रथइवेत्युत्प्रेक्षाअभीयायप्राप्तः ५४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथयुग्मेनाह मधुरैरिति मधुरैः शांतैर्निरीक्षितैरवलोकनैः नपुंसकेभावेक्तः नविद्यतेवशंआयत्तत्वं येषांतानि अवशानिप्रतिकूलानि वशाआयत्ततायांचेतिविश्वः तिर्यंचिमृगपक्ष्यादीनि शमंशांतिं लंभयन्प्रापयन् लभेश्चेतिनुमागमः गत्यर्थेत्यादिनाद्विक

मधुरैरवशानिलंभयन्नपितिर्यंचिशमन्निरीक्षितैः
परितःपटुबिभ्रदंनसांदहनंधाम्विलोकनक्षमं ५५
सहसोपगतःसविस्मयंतपसांसूतिरसूतिरापदां
ददृशेजगतीभुजासुनिःसवपुष्मानिवपुण्यसंचयः५६

र्मकत्वं परितःपटूज्वलंएनसांदह्यतेनेतिदहनंनिवर्तकंतथापिविलोकनक्षमंदर्शनीयं वह्न्यादिविलक्षणमितिभावः धामतेजोबिभ्रत्५५ सहसेति पुनःसहसोपगतः अकस्मादागतः तपसांसूतिप्रभवः आपदांअसूतिः अप्रभवः निवर्तकइतियावत् सपुनिर्व्यासः वपुष्मान्देहधारीपुण्यसंचयः पुण्यराशिरिवेत्युत्प्रेक्षाजगतीभुजारात्रासविस्मयंददृशेदृष्टः ५६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथेति अथदर्शनानंतरं उच्चकैरुन्नतात्यरार्ध्यात्क्षेपात् अर्द्धाच्चपरावरा धमोत्तमपूर्वाच्चेतियत्प्रत्ययः आसनतः सिंहासना
दुद्यन्नुत्तिष्ठन् अतएवधूतानिकंपितान्यरुणानिवल्कलाग्राणियस्यसतथोक्तः सन्नृपः कीर्णविस्तृतमाकपिशमंशुजालंय-
स्यसनथोक्तः सुमेरोः शृंगादुद्यन्तिग्मरश्मिरिवरराज ५७ अवहितेति सनरेंद्रोऽवहितहृदयोऽमनन्तचित्तःसन् चिन्तं

अथोच्चकैरासनतःपरार्ध्यादुद्यन्सधूतारुणवल्कलाग्रः रराजकीर्णकपिशांशुज
जालःशृंगात्सुमेरोरिवतिग्मरश्मिः ५७ अविहितहृदयोविधायसोहामृषिव
दृषिप्रवरेगुरूपदिष्टां तदनुमतमलंचकारपश्चात्प्रशमइवश्रुतमासनंनरेंद्रः५८

तुचेनोत्हृदयंस्वांतं त्वन्मानसंमनइत्यमरः ऋषिप्रवरेमुनिश्रेष्ठे ऋषिवृष्यर्हो अर्हत्यर्थेवतिप्रत्ययः गुरूपदिष्टांशास्त्रीया
मित्यर्थः अर्हांपूजां गुरोश्चहलइत्यकारप्रत्ययः विधायपश्चादनंतरंतदनुमतंतेनानुज्ञातमासनंप्रशमःशांतिः श्रुतंशास्त्र
श्रवणमिवालंचकार उत्कंचपूर्वं प्रशमस्तस्यप्रभवत्यलंक्रियेति सुन्याज्ञयोपविष्टवानित्यर्थः ५८ ७ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

व्यक्तेति व्यक्तोदितैः स्पष्टोद्गतैः स्मितमयूखैर्विभासितावोष्ठौ यस्यसतथोक्तः विकीर्णधाम्नोविस्तृततेजसोसुनेरभिसुरवंति षन् सन्नृपः इदुंसमृदुंदीसमितियावत् अंशुजालंतन्वंतंगुरुंगीष्पतिं गुरुगीष्पतिपित्राद्यावित्यमरः अभितः परि

व्यक्तोदितस्मितमयूखविभासितोष्ठस्तिष्ठन्मुनेरभिसुरवंसविकीर्णधाम्नः तन्वंतमि
दुमभितोगुरुमंशुजालंलक्ष्मीसुवाहसकलस्यशशांकमूर्तेः ५९ श्रीराम
इतिश्रीभारविकृतौकिरातार्जुनीयेमहाकाव्येद्वितीयःसर्गःसमाप्तः शुभंभव०

नइत्यादिनाद्वितीया अभितोअभिसुरवंतिष्ठतइतिशेषः सकलस्यसंपूर्णस्यशशांकामूर्तिर्यस्यतस्येंदोर्लक्ष्मीसुवाहवहतिस्म अत्रोपमेयस्यराज्ञउपमानेंदुधर्मेणलक्ष्म्याः साक्षात्संबंधासंभवात्तत्सदृशींलक्ष्मीमितिप्रतिबिंबकरणाक्षेपादसंभवद्वस्तु संबंधात्पदार्थवृत्तिर्निदर्शनालंकारः तदुक्तंप्रतिबिंबस्यकरणंसंभवतियत्रवस्तुयोगेन गम्येनासंभवतानिदर्शनाद्विधा-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भिमतेति ५९ इतिश्रीमहोपाध्यायमल्लिनाथसूरिविरचितायांकिरातार्जुनीयव्याख्यायांघंटापथसमाख्यायांद्वि-
तीयः सर्गः समाप्तः शुभंभवतु शके १७८३ दुर्मतिनामसंवत्सरे ज्येष्ठेमासिकृष्णपक्षेद्वादश्यामिदंसमाप्तं

इतिकिरातार्जुनीयेकाव्येद्वितीयःसर्गःसमाप्तः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=21.05.20 11:22
,TRANSFERRED=2020/05/21 at 11:27:05
,PAGES=45
,TYPE=STD
,NAME=S0003022
,Book Name=M-3005-KIRATAJUNIKEY KAVY DWITIYE SARG
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection